National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 379-383
© 2026 NJHSR
www.sanskritarticle.com

**ए. आर्पितावर्षिणी**
शोधच्छात्रा,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**ए. आर्पितावर्षिणी**
शोधच्छात्रा,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# विप्रतिषेधसूत्रस्थपरिभाषाद्वयविषये वैद्यनाथमतविमर्शः

**ए. आर्पितावर्षिणी**

**शोधसारः**

अस्मिन् शोधपत्रे विप्रतिषेधसूत्रसम्बद्धयोः "सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव" तथा "पुनःप्रसङ्गविज्ञानात् सिद्धम्" इति परिभाषयोः विषये वैद्यनाथकृतस्य विवेचनस्य परीक्षणं कृतम्। परिभाषाद्वयस्य स्वरूपम्, प्रयोजनम्, उदाहरणसमन्वयश्च विस्तरेण निरूप्य कैयटमताधारितां तद्व्याख्यां प्रदर्शितम्। ततः नागेशभट्टेन प्रस्तुताः आक्षेपाः तथा तस्य वैकल्पिकव्याख्यानपद्धतिः समीक्षिताः। विशेषतः व्यक्तिपक्ष-जातिपक्षयोः, नियमत्व-अपूर्वविधित्वयोश्च विषये वैद्यनाथनागेशमतयोः भेदः विविच्यते। विप्रतिषेधपदार्थस्य पुनःशब्दस्य च शास्त्रीयविमर्शस्य आधारेण परिभाषाशास्त्रे नागेशमतस्य वैशिष्ट्यं तथा वैद्यनाथमतस्य समीक्षात्मकमूल्यं प्रतिपाद्यते।

**उपोद्घातः**

व्याकरणं नम किम्? इति प्रश्ने व्याकरणमहाभाष्ये भगवता पतञ्जलिना इदम् उत्तरम् उक्तम् अस्ति, "लक्ष्यलक्षणे व्याकरणम्॥"[1] इति। लक्ष्यं नाम शब्दः, लक्षणं नाम सूत्रम्। अत्र सूत्रेण लक्ष्यस्य संस्कारः क्रियते। तेन च साधुशब्दाः व्युत्पाद्यन्ते। अयम् एव हि व्यापारः प्रक्रिया इत्युच्यते, यया साधुशब्दाः शास्त्रान्विताः व्युत्पाद्यन्ते। तत्र च सूत्रप्रवृत्तिः कथं भवति इति चेत्, "पर्जन्यवल्लक्षणप्रवृत्तिः"[2] इति आह नागेशभट्टः परिभाषेन्दुशेखराख्ये स्वीये ग्रन्थे। तस्याः च परिभाषायाः मूलं भवति *इको झल्* इति सूत्रस्थं भाष्यम् "कृतकारि खल्वपि शास्त्रं पर्जन्यवत्"[3] इति। अस्य च अयम् आशयः। यत्र यत्र शास्त्रस्य प्रवृत्तेः निमित्तं लभ्यते, तत्र सर्वत्र शास्त्रं प्रवर्तते एव॥

इत्थं शास्त्रे प्रवर्तमाने यत्र निमित्तं अस्ति तत्र संस्कृते अपि लक्ष्ये प्रवृत्तिः लक्ष्यते इति चेत्, किमुत यत्र लक्ष्यं न संस्कृतम्। अतः एकस्मिन् लक्ष्ये अनेकानां निमित्तानां सत्त्वात् कदाचित् अनेकस्य सूत्रस्य प्राप्तिः अपि सहजतया बहुत्र सम्भवत्येव इति तु निस्संशयं भवति॥

एवं च एकस्मिन् लक्ष्ये युगपत् द्वयोः सूत्रयोः प्राप्तयोः किं सूत्रं प्रवर्तनीयम् इति संशयः भवत्येव। ईदृशः संशयः न केवलं व्याकरणशास्त्रे सम्भवति, किन्तु मीमांसाशास्त्रे अपि दृश्यते। तत्र हि "श्रुतिलिङ्ग-वाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यम् अर्थविप्रकर्षात्॥"[4] इति सूत्रेण समाधानं दीयते। एवं व्याकरणशास्त्रे, "पूर्वपरनित्यान्तरङ्गापवादानाम् उत्तरोत्तरम् बलीयः"[5] इति परिभाषा उच्यते। द्वयोः सूत्रयोः युगपत् प्राप्तौ किं सूत्रं प्रवर्तनीयम् इति विषये इयं परिभाषा। महती इयं परिभाषा या एकं प्रकरणं सम्पूर्णं व्याप्नोति। यतः गम्भीरा हि तस्य निर्णयस्य प्रक्रिया, यत्र अनेकाः परिभाषा अन्तर्भवन्ति। अनेकानां हि परिभाषाणां संहत्य अर्थबोधिका *पूर्वपर...* इत्यादिनी इयं परिभाषा इति अवधेयम्॥

तत्र पूर्वस्मात् परं सूत्रं बलवत् इत्यर्थः 'विप्रतिषेधे परं कार्यम्'[6] इति सूत्रतः प्राप्यते। उदाहारणार्थं 'सुपि च'[7], 'बहुवचने झल्येत्'[8] इति सूत्रयोः प्राप्तयोः परत्वात् *बहुवचने झल्येत्* इति सूत्रस्य प्रवृत्तौ **रामेभ्यः** इत्यादि रूपं सिद्ध्यति॥

अनेन सूत्रेण या व्यवस्था कृता, तेन जायमानानां दोषाणां परिहाराय 'पुनः प्रसङ्गविज्ञानात् सिद्धम्'[9], 'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव'[10] इति परिभाषाद्वयम् आरभ्यते॥

सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितम् एव॥

**परिभाषार्थः –**

सकृद् अर्थात् एकवारं यत् लक्षणं बाधितं तद् बाधितम् एव, अर्थात् तस्य पुनः प्रवर्तनं नास्ति इत्यर्थः| 'एकस्य सकृच्च'[11] एकवारम् इत्यर्थे सकृत् इति प्रयोगः सिद्ध्यति। गतिशब्दस्य अत्र प्रवृत्तिः इत्यर्थः। कस्य प्रवृत्तिः इति चेत्, सूत्रद्वयस्य एकस्मिन् लक्ष्ये एकवारमेव प्रवृत्तौ इत्यर्थः प्राप्यते। तथा सति यत् सूत्रं बाधितं भवति, तत् सूत्रं बाधितम् एव, अर्थात्, बाधितस्य सूत्रस्य प्रवृत्तौ निमित्तसत्त्वे अपि न तस्य प्रवृत्तिः इत्यर्थः॥

**उदाहरणसमन्वयः –**

**ये पूर्वासः** इति उदाहरणम्। छान्दसम् इदम् उदाहरणम्। *पूर्वा जस्* इति स्थिते 'जसः शी'[12] इत्यपि प्राप्नोति, एवं च 'आजसेरसुक्'[13] इत्यपि प्राप्नोति। अत्र च "द्वयोः शास्त्रयोः क्वचिल्लब्धावकाशयोः युगपत्सम्भवः तुल्यबलविरोधः वर्तते"[14] । जसः शी इत्यस्य छोन्दोभिन्नविषये *सर्वे* इत्यादौ चारितार्थ्यं वर्तते। *आज्जसेरसुक्* इत्यस्य च *ब्राह्मणासः* इत्यादौ चारितार्थ्यं वर्तते। अनयोः अन्यत्र चरितार्थयोः युगपत् *पूर्वा जस्* इत्यत्र प्राप्तौ परत्वात् *आज्जसेरसुक्* इत्यस्य प्रवृत्तौ *पूर्वासः* इति रूपं सिद्ध्यति॥

अत्र च असुकः ब्राह्मणासः इत्यादौ चारितार्थ्यसत्त्व अपि व्यक्तिपक्षे स्वीकृते तु प्रतिलक्ष्यं लक्ष्यभेदकल्पनात् पूर्वासः इत्यत्र अपि प्राप्नोति। तथा च उभयोः ण्वुल्तृचौ इतिवत् पर्यायेण प्रवृत्तिः प्राप्ता। तथा *सति विप्रतिषेधे परं कार्यं* इति सूत्रस्य व्यक्तिपक्षस्वीकारेण परिहारः क्रियते। व्यक्तिपक्षे तु प्रतिलक्ष्यं लक्षणस्य आवृत्तिः, अर्थात् उपप्लवः कल्प्यते। ततः उभयोः अपि सूत्रयोः प्राप्तयोः सतोः यत् विप्रतिषेधसूत्रम् आरभ्यते, तस्य प्राप्तौ सत्याम् आरभ्यमाणत्वात् नियमत्वं सम्भवति। अतः विप्रतिषेधे परम् एव, न पूर्वम् इति नियमार्थः फलति। अतः यत् सूत्रं बाधितं भवति, तस्य अन्यत्र प्रयोजनं भवितुम् अर्हति इति कृत्वा तस्य सूत्रस्य अत्र अप्रवृत्तिः उच्यते।

प्रकृते च बाधितस्य शीभावस्य पुनः प्रवृत्तिः नास्ति इति कृत्वा *पूर्वासः* इति सिद्धम्॥

अत्र प्रश्नः उदीयात् – यदि उपप्लुतस्य सूत्रस्य अप्रवृत्तिः उच्यते, तर्हि तस्य सूत्रस्य वैयर्थ्यं स्यात् इति। तत्र कैयटमतानुसारम् इत्थम् उत्तरं भवति – सूत्रस्य अनुपप्लवः एव कल्प्यते अत्र इति। तथा हि, सूत्रस्य व्यक्तिपक्षस्वीकारज्ञापनात् एव इयं परिभाषा सिद्ध्यति, "सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितम् एव"[15] इति॥

**उदाहरणान्तरम् –**

स्तात् इति द्वितीयम् उदाहरणं प्रदर्शितम्। अत्र 'तुह्योस्तातङ्ङा-शिष्यन्यतरस्याम्'[16] इति सूत्रेण तातङ्ङादेशे क्रियमाने 'अनेकाल्शि-त्सर्वस्य'[17] इति सर्वादेशोऽपि प्राप्तः, 'ङिच्च'[18] इति अन्त्यादेशोऽपि प्राप्तः। तत्र अन्यत्र चरितार्थयोः द्वयोः युगपद् एकत्र प्राप्तौ परत्वात् *अनेकाल्शित्सर्वस्य* इति प्रवर्तते। तेन सम्पूर्णस्य तिपः आदेशो भवति। अतः **स्तात्** इति सिद्ध्यति।

न च अत्र अपवादत्वात् *ङिच्च* इत्यस्य प्रवृत्तिः। यतो हि आनङादिषु ङित्त्वस्य सर्वादेशत्वेन चरितार्थतया यत्र तातङि ङित्त्वं सम्प्रसा-रणाद्यर्थं प्रयुक्तं भवति, तत्र अन्त्यादेशो न, किन्तु परत्वात् सर्वादेशः एव। तदुक्तं कौमुद्याम् – "यद्यपि ङिच्च इत्ययम् अपवादः तथाऽपि अनन्यार्थङित्त्वेषु अनङादिषु चरितार्थः इति गुणवृद्धिप्रतिषेधसम्प्रसा-रणाद्यर्थतया सम्भवत्प्रयोजने ङकारे तातङि मन्थरं प्रवृत्तः परेण बाध्यते"[19] इति। अत्र सूत्रे बालमनोरमाकाराः अपि भाष्यपङ्क्त्यु-द्धरणेन इमम् आशयं स्पष्टीकुर्वन्ति। तदुक्तं भाष्ये – "ङित्त्वस्य सावकाशत्त्वात् विप्रधिषेधात् तातङ्सर्वादेशः"[20] इति।

अत्र अपि प्रकृतपरिभाषया तातङः सर्वादेशः एव, न तु *ङिच्च* इति अन्त्यादेशः॥

**अत्र नागेशमतपरिष्कारः –**

नागेशस्तु अत्र विप्रतिपद्यते। अस्याः परिभाषायाः सिद्धिप्रकारे वैमत्यं प्रदर्श्यते। वैद्यनाथः कैयटमतानुसारं विप्रतिषेधसूत्रस्य व्यक्ति-पक्षाश्रयणेन अस्याः परिभाषायाः सिद्धिं वक्ति। नागेशस्तु इमम् अंशं नाङ्गीकरोति। व्यक्तिपक्षे सर्वाण्यपि लक्ष्यभूतानि लक्षणं व्याप्नोति इत्यतः प्राप्ते आरभ्यमाणो विधिः नियमाय भवति इति युक्तिः दुरुपपादा भवति इति तन्मतम्।

अतः शास्त्रीयदृष्टान्तस्वीकारेण व्यवस्था क्रियते अनेन। तत्र ण्वुल्तृचौ इति दृष्टान्तः। ण्वुल्तृचौ इत्यत्र यथा ण्वुल्-प्रत्ययः तृच्-प्रत्ययः च पर्यायेण प्राप्नुतः, तुल्यया रीत्या पूर्वं परं च शास्त्रं पर्यायेन प्राप्नुतः। अतः प्राप्ते सति आरभ्यमाणा विधिः नियमाय भवति इति कृत्वा विप्रतिषेधसूत्रं नियमसूत्रं भवति। तथा सति परमेव भवति, न पूर्वम्

इति नियमार्थः सिद्ध्यति। तेन **तिस्रः** इत्यादि रूपं सिद्ध्यति इति नागेशः। किञ्च वैद्यनाथोक्तम् उदाहरणम् अपि अत्र समन्वेतुं शक्यते। *पूर्वासिः* इत्यादावपि परः एव असुक् भवति, न पूर्वः शीभावः इति कृत्वा सामञ्जस्यं भवति॥

पुनःप्रसङ्गविज्ञानात् सिद्धम्॥

**परिभाषार्थः –**

"परस्मिन् प्रवृत्ते यदि पूर्वस्य प्राप्तिः अस्ति, तर्हि सोऽपि भवति"[21] इति द्वितीयस्याः परिभाषायाः अर्थः। *परस्मिन् प्रवृत्ते* इति अध्याहार्यम्। पुनः प्रसङ्गो नाम पुनः प्राप्तिः। पुनः यदि पूर्वसूत्रस्य प्राप्तिः निमित्तसत्त्वाद् विज्ञायते, तर्हि परस्य सूत्रस्य प्रवृत्तेः ऊर्ध्वं पूर्वम् अपि सूत्रं प्रवर्तिष्यते इति परिभाषायाः अर्थः॥

**उदाहरणसमन्वयः –**

**भिन्तात्, भिन्धि** इति उदाहरणम्। भिदिर्-विदारणे इति धातोः लोट्-लकारे मध्यमे पुरुषे एकवचने इमे रूपे।

भिदिर् लोट् (लोट् च॥३/३/१६२॥)

भिद् सिप् [अनुबन्धलोपः] (तिप्तस्झि...॥३/४/७८॥[22])

भि श्नम् द् सि (रुधादिभ्यः श्नम्॥३/१/७८॥) [मिदचोऽन्त्यात् परः॥१/१/४७॥]

भि न द् हि [अनुबन्धलोपः] (सेर्ह्यपिच्च॥३/४/८७॥)

भि न द् तातङ् (तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्॥७/१/३५॥)

भि न् द् तात् [अनुबन्धलोपः] (श्नसोरल्लोपः॥६/४/१११॥)

भि न् त् तात् (खरि च॥८/४/५५॥)

**भिन्तात्॥**

भिदिर् लोट् (लोट् च॥३/३/१६२॥)

भिद् सिप् [अनुबन्धलोपः] (तिप्तस्झि...॥३/४/७८॥[23])

भि श्नम् द् सि (रुधादिभ्यः श्नम्॥३/१/७८॥) [मिदचोऽन्त्यात् परः॥१/१/४७॥]

भि न द् हि [अनुबन्धलोपः] (सेर्ह्यपिच्च॥३/४/८७॥)

भि न द् धि (हुझल्भ्यो हेर्धिः॥६/४/१०१॥)

भि न् द् धि (श्नसोरल्लोपः॥६/४/१११॥)

**भिन्धि॥**

अत्र *भि न द् हि* इति स्थिते *तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्* इत्यपि प्राप्नोति, *हुझल्भ्यो हेर्धिः* इत्यपि प्राप्नोति। *तुह्योः...* इत्यस्य प्रथमपुरुषे चारितार्थ्यम्। *हुझल्भ्यो...* इत्यस्य च अनाशिषि चारितार्थ्यम्। एवम् अन्यत्र चरितार्थयोः शास्त्रयोः युगपत् एकत्र प्राप्तौ विप्रतिषेधे सति *विप्रतिषेधे परं कार्यम्* इति सूत्रेण परमेव इति नियमे कृते पूर्व धिभावो न स्यात्। तेन च, भिन्धि इति रूपं न स्यात्॥ अतः *पुनःप्रसङ्गविज्ञानात् सिद्धम्* इति परिभाषा आरब्धा। अनेन च तुह्योः इति प्रवृत्तौ अभावसमानाधिकरणतातङि विहिते सति अभावपक्षे पुनः पूर्वस्य धिभावस्य प्रसङ्गः, अर्थात् प्राप्तिनिमित्तं लक्ष्यते, तत्र हेः सत्त्वात्। अतः *हुझल्भ्यो हेर्धिः* इति सूत्रे प्रवृत्ते **भिन्धि** इति रूपं सिद्ध्यति॥

अत्र च विप्रतिषेधसूत्रस्य अपूर्वविधित्वं स्वीक्रियते। कथम् इति निरूप्यते ग्रन्थकारेण वैद्यनाथेन। तत्र भाष्यस्थं वार्तिकम् उदाहरति "अप्रतिपत्तिः वा उभयोः तुल्यबलत्वात्"[24] इति। विप्रतिषेधे परं कार्यम् इति सूत्रे भाष्ये इदं वार्तिकम् उद्धृतम्। तत्र हि उच्यते, यतः उभयोः शास्त्रयोः तुल्यबलत्वम् उच्यते, अतः उभयोः अपि अप्रतिपत्तिः भवति इति। तस्मात् अप्राप्ते नूतनतया परस्य विधानार्थम् आरभ्यमाणं विप्रतिषेधसूत्रम् अपूर्वविधिः भवति। अतः परम् एव इति नियमार्थः न भवति, किन्तु परं स्यात् इति अपूर्वविधिः प्राप्यते। तथा सति परस्मिन् विहिते पुनः पूर्वस्य अपि निमित्तसत्त्वात्, तस्य अपि प्रसङ्गे, प्राप्तौ सत्यां तस्य अपि प्रवृत्तिः भवति इति सिद्धा इयं परिभाषा "पुनः प्रसङ्गविज्ञानात् सिद्धम्"[25] इति॥

इत्थं च, लक्ष्यानुरोधेन क्वचित् जातिपक्षाश्रयणेन पुनःप्रसङ्गन्यायसिद्धिः, व्यक्तिपक्षाश्रयणेन सकृद्गतिन्यायसिद्धिः इति व्यवस्थितिः। तदुक्तं वैद्यनाथेन – "विप्रतिषेधसूत्रे लक्ष्यसिद्धये क्वचित् जातिपक्षः क्वचित् व्यक्तिपक्षः इत्यवगन्तव्यम्"[26] इति।

**अत्र नागेशमतपरिष्कारः -**

अत्र अपि नागेशः विप्रतिपद्यते – जातिपक्षे सर्वं लक्ष्यं न् व्याप्नोति लक्षणम् इत्यत्र मानं नास्ति इति तन्मतम्। अतः व्यक्तिपक्षे नियमत्वसिद्धिः, जातिपक्षे च अपूर्वविधित्वसिद्धिः इति दुरुपपादम्। अतः तेन लौकिकदृष्टान्तस्वीकारेण लोकन्यायसिद्धत्वम् अस्याः परिभाषायाः वर्ण्यते। अत्र प्रैष्यदृष्टान्तः प्रयुक्तः। यथा एककालावच्छेदेन उभाभ्यां स्वामिभ्यां विरुद्धयोः दिशोः प्रेषितः प्रैष्यः नैकस्यापि कार्यं करोति, तद्वत् उभयोः शास्त्रयोः प्राप्तयोः एकम् अपि शास्त्रं न प्रवर्तते इति कृत्वा अप्राप्ते विधीयमानं विप्रतिषेधसूत्रं अपूर्वविधिः भवति। तदुक्तं स्वग्रन्थे नागेशेन – "तत्र लक्ष्यानुसारात् क्वचित् शास्त्रीयदृष्टान्ताश्रयणं, क्वचित् लौकिकदृष्टान्ताश्रयणम् इति भाष्यसम्मतमार्गः एव युक्तः इति बोध्यम्"[27] इति॥

**विप्रतिषेधपदार्थविमर्शः –**

तथा च परिभाषाद्वयं निरूप्य ग्रन्थकाराः विप्रतिषेधपदार्थं विव्रुण्वते। "एकस्मिन्नुदाहरणे सावकाशयोः प्रसक्तिमात्रं विप्र-तिषेधः"[28] इति। विरोधमात्रं विप्रतिषेधः इत्यभिमानिनं पूर्वपक्षिणम् उद्दिश्य अयम् अर्थः सिद्धान्तितः वर्ण्यते। अथवा एकस्मिन् स्थानिनि उभयोः कार्ययोः प्राप्तिः विरोधः विप्रतिषेधः इत्याशयं दूषयित्वा इदम् उच्यते। भिन्धि, पूर्वासः इत्यादौ एकस्मिन् एव स्थानिनि हिकारे वा जस्-प्रत्यये वा तातङ्-धिभावौ, असुक्-शीभावौ वा प्राप्तौ इति कृत्वा अयं पूर्वपक्ष्युक्तः अर्थः अभिमतः। किन्तु न सः अर्थः युक्तः। एकस्मिन् उदाहरणे उभयोः सूत्रयोः प्राप्तिमात्रम् अपि विप्रतिषेधः भवितुम् अर्हति। यदि अयम् अर्थः न स्वीक्रियेत, तर्हि **दाक्षिः** इत्याद्युदाहरणे क्लेशः स्यात्। दक्ष-शब्दात् 'अत इञ्'[29] इति सूत्रेण इञ्-प्रत्ययः विधीयते। तथा च युगपत् 'तद्धितेष्वचामादेः'[30] इति आदिवृद्धिरपि प्राप्ता, 'अचो ञ्णिति'[31] इति अन्त्यवृद्धिरपि प्राप्ता। यदि एकस्मिन् स्थानिनि एव विरोधः स्यात्, तर्हि अत्र विप्रतिषेधाभावे आदिवृद्धिरपि स्यात्, अन्त्यवृद्धिरपि स्यात्। अतस्तद्वारणाय इदम् उच्यते। तथा च *दक्ष इञ्* इति एकस्मिन् उदाहरणे आदिवृद्धिः अन्त्यवृद्धिश्च प्राप्ते इति कृत्वा तयोः प्रसक्तिमात्रं विप्रतिषेधः इत्यतः अत्र विप्रतिषेधसूत्रप्रवृत्तौ व्यक्तिपक्षाश्रयणेन वा शास्त्रीयदृष्टा-न्तस्वीकारेण वा नियमत्वसिद्ध्या सकृद्गतिन्यायस्य प्रवृत्तौ परमेव इति आदिवृद्धिरेव प्रवर्तते। अतः **दाक्षिः** इति रूपं सिद्ध्यति। तदुक्तं वैद्यनाथेन – "तेन आदिवृद्धेः अन्त्योपधावृद्धिभ्यां विप्रतिषेध उपपद्यते इति बोध्यम्"[32] इति॥

**पुनश्शब्दविचारः –**

'पुनर्' इति शब्दः स्वरादिगणे पठितः। तस्य च असत्त्ववचनत्वम् अस्ति, अर्थात् लिङ्गसङ्ख्याद्यन्वयित्वं नास्ति। अतः लिङ्गाद्यर्थेषु विधीयमानाः सुपः प्रत्ययाः सामर्थ्याभावात् नैव प्राप्नुवन्ति। अतः सु-प्रत्ययस्य अनुत्पत्तौ रुत्वं न स्यात्, रुत्वस्य च अभावे विसर्गो न स्यात्। अतः 'पुनः प्रसङ्गविज्ञानात्' इति विसर्गघटितं उपध्मानी-यघटितं वा रूपं नैव सिद्ध्येत् इति पूर्वपक्षः। अत्र च अनेकानि समाधानानि दीयन्ते॥

**प्रथमं समाधानम् –**

'कर्मिणि द्वितीया'[33] इति सूत्रं विचार्यते। अत्र हि भिन्नवाक्यता वर्तते इति पक्षः स्वीक्रियते। अर्थात्, *स्वौजस्...*[34] इति सूत्रेण एकवाक्यता नास्ति। तथा च सामान्येन *स्वौजस...* इत्यादिना स्वदिषु विहितेषु तस्य नियमनं *कर्मणि द्वितीया* इत्यादिना क्रियते। तत्र च प्रकृत्यर्थनियमः प्रत्ययनियमः इति च नियमद्वयम् उपपद्यते, अर्थात् कर्मण्येव द्वितीया इति प्रकृत्यर्थनियमः, कर्मणि द्वितीया एव इति प्रत्ययनियमः च उपपद्यते। तथा च सजातीयनियमाश्रयणं भवति, अर्थात् नियमनं क्रियमाणं सत् सजातीयम् एव व्यावर्तयितुं शक्नोति। एवं च *रामः ग्रामं गच्छति* इत्यादौ ग्रामशब्दात् कर्मार्थप्रकृतिकात् शब्दात् कर्मण्येव द्वितीया भवति, न तु सजातीय-करणादिकारकार्थे इति प्रकृत्यर्थनियमप्रयोजनम्। ग्रामशब्दात् कर्मणि द्वितीया एव भवति, न तु सजातीय-तृतीयादिविभक्तिः इति प्रत्ययनियमस्य प्रयोजनम्। एवम् अर्थे स्वीकृते एव *स्वौजस...* इत्यनेन सामान्यतया स्वादीनां विधानम् इति वक्तुं शक्यते। तथा च फलित-नियमद्वयस्य पुनर्-शब्दे प्राप्त्यभावात्, तत्र लिङ्गसङ्ख्याकारकाद्यन्वयाभावेन कर्मादिसजातीय-कारकार्थानाम् अभावात्, द्वितीयादिनियमविधान-अनुपपत्त्या सामान्येन *स्वौजस...* इत्यनेन सु-प्रत्ययः विधातुं शक्यते। तस्मात् सु-प्रत्ययः *पुनर्* इति अव्ययात् भवति। तस्मात्, सोः रुत्व, रुत्वस्य च विसर्गे, तस्य वा उपध्मानीये "पुनः प्रसङ्गविज्ञानात् सिद्धम्" इति परिभाषायाः आनुपूर्वी सिद्ध्यति॥

**द्वितीयं समाधानम् –**

'अव्ययादाप्सुपः'[35] इति सूत्रं विचार्यते। "अव्यवाद् विहितस्य आपः सुपः च लुक् स्यात्"[36] इति अस्य अर्थः। अत्र यदि अव्ययेभ्यः लिङ्गसङ्ख्यादीनाम् अभावात् सुबुत्पत्तिरेव न स्यात्, तर्हि तस्य लुग्वचनं व्यर्थं स्यात्। प्रसक्तस्य हि लुक् शक्यते कर्तुं, न तु अप्राप्तस्य। तस्माद् आचार्यप्रवृत्तिः सुबुत्पत्तिम् ज्ञापयति। अर्थात्, अव्ययेभ्यः सुबुत्पत्त्यभावे सुपः लुग्विधानरूपा आचार्यप्रवृत्तिः ज्ञापयति यत्, अव्ययेभ्यः सुप् भवति इति। तदुक्तं भाष्ये – "अथवा आचार्यप्रवृत्तिः ज्ञापयति – उत्पद्यन्ते अव्ययेभ्यः स्वादयः इति। यदयम् अव्ययादाप्सुपः इति लुकं शास्ति॥"[37] इति॥

**तृतीयं समाधानम् –**

'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा'[38] इति सूत्रेण् प्रातिपदिकार्थाद्यर्थेषु प्रथमा विभक्तिः विधीयते तत्र च लिङ्गस-ङ्ख्यापरिमाणादयः अर्थविशेषाः एव सर्वे निर्दिष्टाः। अतः *प्रातिपदिकार्थ...* इत्यत्र अर्थग्रहणं विना अपि प्रातिपदिकार्थे एव प्रथमा सिद्ध्यति। अतः अत्र अर्थग्रहणं व्यर्थम्। तत् च अर्थग्रहणं व्यर्थं सत् ज्ञापयति, केवलम् अर्थवच्छब्दादपि प्रथमा भाति इति। अर्थात् यत्र लिङ्गसङ्ख्यादीनाम् अन्वयो नास्ति, तादृशात् अपि केवलम् अर्थवत्प्रातिपदिकात् असत्त्वार्थेकेभ्यः अव्ययादिभ्यः प्रथमा भवति इति ज्ञाप्यते। तदुक्तं ग्रन्थकारेण – "प्रातिपदिकार्थसूत्रे अर्थग्रहणाद्वा। तद्धि केवलम् अर्थवच्छद्वात् निस्सङ्ख्यात् प्रथमार्थम् इति रक्षितः॥"[39] इति।

तथा च प्रकृते अपि असत्त्वार्थात् पुनर्-शब्दात् प्रथमा विभक्तिः भवति इति कृत्वा "पुनः प्रसङ्गविज्ञानात् सिद्धम्" इति आनुपूर्वी सिद्ध्यति॥

**सहायकग्रन्थसूची**


- पाणिनिः — *अष्टाध्यायी*।
- पतञ्जलिः — *व्याकरणमहाभाष्यम्*।
- कैयटः — *महाभाष्यप्रदीपः*।
- नागेशभट्टः — *परिभाषेन्दुशेखरः*।
- नागेशभट्टः — *परिभाषेन्दुशेखरटीका (गदा)*।
- भट्टोजिदीक्षितः — *सिद्धान्तकौमुदी*।
- वासुदेवशास्त्री अभ्यङ्करः (सम्पा.) — *परिभाषेन्दुशेखरः*।
- वैद्यनाथ पायगुण्डे — *परिभाषेन्दुशेखरव्याख्या (चिदस्तिमाला*
- */ प्रभा-व्याख्या)*।
- हरदत्तमिश्रः — *पदमञ्जरी*।
- भर्तृहरिः — *वाक्यपदीयम्* (परिभाषा-विमर्शसन्दर्भे)।


**पाद टिप्पणी –**

1. व्याकरणमहाभाष्यम् आ.१
2. परिभाषेन्दुशेखरः १२०
3. व्याकरणमहाभाष्यम् (१/२/९)
4. जैमिनीयसूत्रम् (३/३/१४)
5. परिभाषेन्दुशेखरः ३८
6. अष्टाध्यायी (१/४/२)
7. अष्टाध्यायी (७/३/१०२)
8. अष्टाध्यायी (७/३/१०३)
9. परिभाषार्थसङ्ग्रहः २१
10. परिभाषार्थसङ्ग्रहः २०
11. अष्टाध्यायी (५/४/१९)
12. अष्टाध्यायी (७/१/१८)
13. अष्टाध्यायी (७/१/५०)
14. बालमनोरमा १७५
15. परिभाषार्थसङ्ग्रहः २०
16. अष्टाध्यायी (७/१/३५)
17. अष्टाध्यायी (१/१/५५)
18. अष्टाध्यायी (१/१/५३)
19. वै.सि.कौ. २१९७
20. व्याकरणमहाभाष्यम् (७.१.३५)
21. परिभाषार्थसङ्ग्रहः २१
22. तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्॥ ३/४/७८॥
23. तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्॥ ३/४/७८॥
24. व्याकरणमहाभाष्यम् (१/४/२)
25. परिभाषार्थसङ्ग्रहः २१
26. परिभाषार्थसङ्ग्रहः २१
27. परिभाषेन्दुशेखरः ४०
28. परिभाषार्थसङ्ग्रहः २१
29. अष्टाध्यायी (४/१/९५)
30. अष्टाध्यायी (७/२/११७)
31. अष्टाध्यायी (७/२/११५)
32. परिभाषार्थसङ्ग्रहः २१
33. अष्टाध्यायी (२/३/२)
34. स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसांङ्योस्सुप्॥४/१/२
35. अष्टाध्यायी (२/४/८२)
36. वै.सि.कौ. ४५२
37. व्याकरणमहाभाष्यम् (२/४/८२)
38. अष्टाध्यायी (२/३/४६)
39. परिभाषार्थसङ्ग्रहः २१